तस्मादविद्वान्नादद्यादल्पयोऽपि प्रतिग्रहम् ।
विषमल्पाप्रतिग्राही विषेणाल्पेन नश्यति ॥”*॥
गर्हितप्रतिग्रहादिर्यथा,—
“हस्तिकृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः ।
सद्विप्रास्तान् गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्रविक्रयी ।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥”*॥
आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—
“प्रोक्तप्रतिग्रहाभावे प्रोक्तायां ह्यहदापदि ।
विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाघभाक् ॥
गुर्व्वादिपोष्यवर्गार्थं देवाद्यर्थञ्च सर्व्वशः ।
प्रयाददद्याद्द्विजो यस्तु भृत्यर्थमात्मनोऽपि च ॥
दधिचौराज्यमांसानि गन्धपुष्पाम्बुमत्स्यकान् ।
शय्याशनासनं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मभ्यः समादद्यादयाचितम् ।
पतितेभ्यस्तथान्येभ्यः प्रतिग्राह्यमसंशयम् ॥”*॥
प्रतिग्रहीतुं शक्तस्य लभ्यमानपरित्यागेन स्वर्गो
भवति । यथा,—
“शक्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः ।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम् ॥”*॥
प्रतिग्रहस्वयं वापि याचितं यो न यच्छति ।
तत्कोटियुग्मितयस्तो न्वतो दासत्वमृच्छति ॥*॥
दाता च न स्मरेद्दानं प्रतिग्राही न याचते ।
तावुभौ नरकं यातो दाता चैव प्रतिग्रही ॥*॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति ।
प्रत्यर्चं लिङ्गमेवेह दाठ्यायाचकयोर्ब्बलम् ॥
दाठ्यहस्तो भवेद्दूर्द्धमधस्तात् प्रतिग्रही ।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही व्रजत्यधः ॥”*॥
प्रतिग्रहप्रकारो यथा,—
“भूमेः प्रतिग्रहं कुर्य्याद्भूमिं कृत्वा प्रदक्षिणम् ।
करे गृह्य तथा कन्यां दासदास्यौ तथा द्विजाः ॥
करं हि हृदि विन्यस्य धर्म्मो ज्ञेयः प्रतिग्रहः ।
आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः ॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः ।
प्रतिगृह्णीत गां शृङ्गे पुच्छे कृष्णाजिनं तथा ॥
आरण्याः पशवः सर्व्वे ग्राह्याः पुच्छे विचक्षणैः ।
प्रतिग्रहमयोरुस्य आरुह्यैव तु पादुके ॥
ईशायान्तु रथो ग्राह्यश्छत्रे दण्डन्तु धारयेत् ।
द्रुमाणामथ सर्व्वेषां मूले न्यस्तकरो भवेत् ॥
आयुधानि समादाय तथा भूष्य विभूषणम् ।
धर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम् ॥
अवतीर्य्य तु सर्व्वाणि जलस्थानानि चैव हि ।
उपविश्य च शय्यायां स्पर्शयित्वा करेण वा ॥
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणं पठेत् ।
कन्यादाने न तु पठेद्द्व्याणि च पृथक् पृथक् ॥
प्रतिग्रहा द्विजश्रेष्ठ तत्रैवान्नर्भवन्ति ते ।
द्रव्याणामथ सर्व्वेषां द्रव्यसंश्रयणान्नरः ॥
वाचयेज्जलमादाय करेण च प्रतिग्रहम् ।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम् ॥
स द्रव्यस्तैन्यसंयुक्तो नरकं प्रतिपद्यते ।
अथापि हि प्रवक्ष्यामि विधिं सर्व्वं विशेष-
यात् ॥ * ॥
वाजिप्रदानेन प्रतिग्रहे वा
दातृग्रहीत्रोरपि येन पुण्यम् ।
स्वर्गं प्रजायेत प्रयाणमेतत्
गृहीतयोर्वै विधिवद्द्विजेन्द्र ॥
कुर्य्याद्दसौ पञ्चदिनानि पूर्व्वं
पञ्चोपचारैर्युतविष्णुपूजाम् ।
कुष्माण्डमन्त्रैर्घृतदुग्धहोमं
यद्ग्राम इत्यादि सरस्वतीयम् ॥
सोङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्द्विजेन्द्रः ।
सूर्य्येण मन्त्रेण च तद्वदष्टौ
यत्रा प्रयुक्तं त्रिशतं जुहोति ॥
कुर्य्याच गायत्रिजपं सहस्रं
पश्चात् प्रगृह्णीं तुरगं द्विजाग्र्यः ।
तद्वत्तथात्मानमयं नयेद्धि
दातापि चैतद्व्रतमाविदध्यात् ॥
द्विजाग्र्यवत् प्राक्तनपापशुद्धे
द्वावप्यमू स्वर्गजनं लभेताम् ॥”
इति हयशीर्षे । ४ । ८ । अध्यायः ॥*॥
अपि च । विष्णुधर्म्मोत्तरे ।
“बीजानां मुष्टिमादाय रत्नान्यादाय सर्व्वतः ।
वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके ।
प्रतिग्रहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् ॥
ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम् ।
समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
विधिं धर्म्मज्ञमयो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् ।
दात्रा सह तरत्येव नानादुर्गाण्यसौ द्विजः ॥”
ब्रह्मपुराणे ।
“ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा ।
अयश्चमपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत् ॥
शय्यालङ्कारवस्त्रादि प्रतिगृह्य म्वतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥”
तथा ।
“ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति ।
आतुराद्यद्गृहीतन्तु तत् कथं वै तरिष्यति ॥”
एतदादिद्रव्यदानं प्रतिग्रहीतुर्द्दोषजनकम् ॥*॥
एतदनिच्छवे विद्यादिरहितत्वेनाक्षमर्थाय च
दातुरपि दोषजनकमाह दक्षः ।
“न केवलं हि तद्याति श्रेयमस्य च नश्यति ।”
तद्व्याख्यम् । अतएव याज्ञवल्क्यः ।
“विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥”
अधो नरकम् ॥ * ॥ एतद्दानप्रतिग्रहोत्तरसक्त-
तपोजपादिभिरात्मतरणक्षमाय स्वेच्छया प्रति-
गृह्णते दानं न दोषाय इत्याह विष्णुः ।
“एतानि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो न तु ।
तस्मै दाने न दोषोऽस्ति यस्मात्मानन्तु तारयेत् ॥”
तारणप्रकारमाह हारीतः ।
“मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं
जपेत् ॥” * ॥ देवलः ।
“प्रतिग्रहं समर्थो हि कृत्वा विप्रो यथाविधि ।
निस्तारयति दातारमात्मानञ्च स्वतेजसा ॥”
स्कान्दे ।
“वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम् ।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥”
महाभारते ।
“तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च ।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥”
प्रतिग्रहसमर्थस्य तदकरणे फलाधिक्यं यथा ।
याज्ञवल्क्यः ।
“प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्क-
लान् ॥”
अपवादमाह स एव ।
“कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि
क्षितिः ।
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥”
अन्यच्च ।
“शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन्
दधि ।
मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत् ॥”
मणीन् विषादिनिवारकान् ।
“एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत् ॥”
अभ्युद्यतमप्रार्थ्य दत्तम् ।
“सर्व्वतः प्रतिगृह्णीयात् मध्वथोभयदक्षिणाम् ॥”
किमिति न प्रत्याख्येयमित्याह मनुः ।
“अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥”
प्रतिग्रहमात्रे प्रयोगसारे ।
“प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया ।
देवतातिथिपूजार्थं यत्नाद्धनमुपार्ज्जयेत् ॥”
अङ्गिराः ।
“कुटुम्बार्थं द्विजः शूद्रात् प्रतिगृह्णीत याचितम् ।
क्रत्वर्थमात्मने चैव न हि याचेत कर्हिचित् ॥”
यज्ञार्थं याचने निन्दामाह याज्ञवल्क्यः ।
“चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात् ॥”
इति शुद्धितत्त्वम् ॥
प्रतिग्राहः, पुं, (प्रतिगृह्णाति निष्ठीवनादिकमिति
प्रति + ग्रह + “विभाषा ग्रहः ।” ३ । १ । १४३ ।
इति णः ।) पतद्ग्रहः । इत्यमरः । २।६।१३८ ॥
(प्रति + ग्रह + भावे घञ् ।) प्रतिग्रहणञ्च ॥
प्रतिघः, पुं, (प्रतिहन्यतेऽनेनेति । प्रति + हन् + कः ।
न्यङ्क्वादित्वात् कुत्वम् ।) क्रोधः । इत्यमरः ।
१ । ७ । २६ ॥ (यथा, माघे । १५ । ५३ ।
“प्रतिघः कुतोऽपि समुपेत्य
नरपतिगणं समाश्रयत् ॥”
प्रतिहननमिति ।) प्रतिघातः । इति मेदिनी ।
घे, १० ॥ मूर्च्छा । इति शब्दरत्नावली ॥
प्रतिघातनं, क्ली, (प्रति + हन् + णिच् + भावे
ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११४ ॥
प्रतिघ्नं, क्ली, (प्रतिहन्यस्मिन्निति । प्रति + हन् +
घनर्थे कः ।) अङ्गम् । इति शब्दचन्द्रिका ॥